# ॥ આ નો ભદ્રાઃ સૂક્તમ્ ॥

.. A no bhadrAH Suktam ..

sanskritdocuments.org

August 20, 2017

# .. A no bhadrAH Suktam ..

# ॥ આ નો ભદ્રાઃ સૂક્તમ્ ॥

## Sanskrit Document Information

Text title : A no bhadrAH sUktam

File name : AnobhadrA.itx

Category : sUkta, veda, svara

Location : doc_veda

Language : Sanskrit

Subject : philosophy/hinduism/religion/veda

Transliterated by : Harissh Swaminathan hari.yajurveda at gmail.com

Proofread by : Harissh Swaminathan hari.yajurveda at gmail.com

Description-comments : Rigveda Mandala 1, Sukta 89

Latest update : June 26, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ આ નો ભદ્રાઃ સૂક્તમ્ ॥

આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોઽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
દેવા નો યથા સદમિદ્ વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવેદિવે ॥ ૧.૦૮૯.૦૧
દેવાનાં ભદ્રા સુમતિરૃજૂયતાં દેવાનાં રાતિરભિ નો નિ વર્તતામ્ ।
દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્રતિરન્તુ જીવસે ॥ ૧.૦૮૯.૦૨
તાન્પૂર્વયા નિવિદા હૂમહે વયં ભગં મિત્રમદિતિં દક્ષમસ્રિધમ્ ।
અર્યમણં વરુણં સોમમશ્વિના સરસ્વતી નઃ સુભગા મયસ્કરત્ ॥ ૧.૦૮૯.૦૩
તન્નો વાતો મયોભુવાતુ ભેષજં તન્માતા પૃથિવી તત્પિતા દ્યૌઃ ।
તદ્ ગ્રાવાણઃ સોમસુતો મયોભુવસ્તદશ્વિના શૃણુતં ધિષ્ણ્યા યુવમ્ ॥ ૧.૦૮૯.૦૪
તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥ ૧.૦૮૯.૦૫
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૧.૦૮૯.૦૬
પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષુ જગ્મયઃ ।
અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ॥ ૧.૦૮૯.૦૭
ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥ ૧.૦૮૯.૦૮
શતમિન્નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ॥ ૧.૦૮૯.૦૯
અદિતિર્દ્યૌરદિતિરન્તરિક્ષમદિતિર્માતા સ પિતા સ પુત્રઃ ।
વિશ્વે દેવા અદિતિઃ પઞ્ચ જના અદિતિર્જાતમદિતિર્જનિત્વમ્ ॥ ૧.૦૮૯.૧૦

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Rigveda Samihita maNDala 1, sUktam 89
Encoded and proofread by Harissh Swaminathan hari.yajurveda at gmail.com

.. A no bhadrAH Suktam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*